श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रम् ॥

देव्युवाच

देवदेव महादेव त्रिकालज्ञ महेश्वर।
करुणाकर देवेश भक्तानुग्रहकारक।
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्वतः ॥ 1 ॥

ईश्वर उवाच

देवि साधु महाभागे महाभाग्यप्रदायकम्।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥ 2 ॥

सर्वदारिद्र्यशमनं श्रवणाद् भुक्तिमुक्तिदम्।
राजवश्यकरं दिव्यं गुह्याद् गुह्यतरं परम् ॥ 3 ॥

दुर्लभं सर्वदेवानां चतुष्षष्टि कलास्पदम्।
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ॥ 4 ॥

समस्त देवसंसेव्यं अणिमाद्यष्टसिद्धिदम्।
किमत्र बहुनोक्तेन देवीप्रत्यक्षदायकम् ॥ 5 ॥

तव प्रीत्याऽद्य वक्ष्यामि समाहितमनाः शृणु।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ॥ 6 ॥

क्लीं बीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी।
अङ्गन्यासः करन्यासः स इत्यादि प्रकीर्तितः ॥ 7 ॥

## ध्यानम्

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
    हस्ताभ्याम् अभयप्रदां मणिगणैः नानाविधैः भूषिताम्।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां
    पार्श्वे पङ्कज शङ्ख पद्मनिधिभिर्युक्तां सदा शक्तिभिः॥ **8** ॥

सरसिजनयने सरोजहस्ते
    धवलतरांशुक गन्धमाल्यशोभे।
भगवति हरिवल्लभे मनोज्ञे
    त्रिभुवन भूतिकरि प्रसीद मह्यम्॥ **9** ॥

प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम्।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम्॥ **10** ॥

वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम्।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम्॥ **11** ॥

अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम्।
नमामि कमलां कान्तां क्षमां क्षीरोदसंभवाम्॥ **12** ॥

अनुग्रहप्रदां बुद्धिमनघां हरिवल्लभाम्।
अशोकां अमृतां दीप्तां लोक शोक विनाशिनीम्॥ **13** ॥

नमामि धर्मनिलयां करुणां लोकमातरम्।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम्॥ **14** ॥

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम्।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम्॥ **15** ॥

पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम्।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम्॥ **16** ॥

चतुर्भुजां चन्द्ररूपाम् इन्दिराम् इन्दुशीतलाम्।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम्॥ **17** ॥

विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम्।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्यांबरां श्रियम्॥ **18** ॥

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम्।
वसुन्धरां उदाराङ्गां हरिणीं हेममालिनीम्॥ **19** ॥

धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम्।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदाम्॥ **20** ॥

शुभां हिरण्यप्राकारां समुद्रतनयां जयाम्।
नमामि मङ्गळां देवीं विष्णुवक्षःस्थलस्थिताम्॥ **21** ॥

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रिताम्।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम्॥ **22** ॥

नवदुर्गां महाकाळीं ब्रह्मविष्णुशिवात्मिकाम्।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम्॥ **23** ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्त देववनितां लोकैक दीपाङ्कुराम्।
श्रीमन्मन्दकटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥ **24** ॥

मातर्नमामि कमले ! कमलायताक्षि !
श्रीविष्णुहृत्कमलवासिनि ! विश्वमातः !।

क्षीरोदजे ! कमलकोमलगर्भगौरि !
लक्ष्मि ! प्रसीद सततं नमतां शरण्ये ! ॥ **25** ॥

## फलश्रुतिः

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः।
दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोति यत्नतः॥ **26** ॥

देवीनामसहस्रेषु पुण्यम् अष्टोत्तरं शतम्।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः॥ **27** ॥

भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम्।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले॥ **28** ॥

दारिद्र्यमोचनं नाम स्तोत्रमंबापरं शतम्।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः।
भुक्त्वा तु विपुलान्भोगानस्याः सायुज्यमाप्नुयात्॥ **29** ॥

प्रातःकाले पठेन्नित्यं सर्वदुःखोपशान्तये।
पठंस्तु चिन्तयेद्देवीं सर्वाभरणभूषिताम्॥ **30** ॥

॥ इति श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रं समाप्तम्॥